শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥শ্রীমন্নারাযণীযে একোনপঞ্চাশং দশকম্॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥শ্রীমন্নারাযণীযে একোনপঞ্চাশং দশকম্॥

## ৱৃন্দাৱনগমনৱর্ণনম্

ভৱৎপ্রভাৱাৱিদুরা হি গোপা -
    স্তরুপ্রপাতাদিকমত্র গোষ্ঠে।
অহেতুমুৎপাতগণং ৱিশঙ্ক্য
    প্রযাতুমন্যত্র মনো ৱিতেনুঃ॥ **49.1** ॥

তত্রোপনন্দাভিধগোপৱর্যো
    জগৌ ভৱৎপ্রেরণযৈৱ নূনম্।
ইতঃ প্রতীচ্যাং ৱিপিনং মনোজ্ঞং
    ৱৃন্দাৱনং নাম ৱিরাজতীতি॥ **49.2** ॥

বৃহদ্বনং তৎ খলু নন্দমুখ্যা
    ৱিধায গৌষ্ঠীনমথ ক্ষণেন।
ৎৱদন্ৱিতৎৱজ্জননীনিৱিষ্ট -
    গরিষ্ঠযানানুগতা ৱিচেলুঃ॥ **49.3** ॥

অনোমনোজ্ঞধ্ৱনিধেনুপালী -
    খুরপ্রণাদান্তরতো ৱধূভিঃ।
ভৱদ্বিনোদালপিতাক্ষরাণি
    প্রপীয নাজ্ঞাযত মার্গদৈর্ঘ্যম্॥ **49.4** ॥

নিরীক্ষ্য ৱৃন্দাৱনমীশ নন্দ -
    ৎপ্রসূনকুন্দপ্রমুখদ্রুমৌঘম্।

অমোদথাঃ শাদ্বলসান্দ্রলক্ষ্ম্যা
হরিন্মণীকুট্টিমপুষ্টশোভম্॥ **49.5** ॥

নৱাকনির্ব্যূঢনিৱাসভেদে -
ষ্বশেষগোপেষু সুখাসিতেষু।
ৱনশ্রিযং গোপকিশোরপালী -
ৱিমিশ্রিতঃ পর্যগলোকথাস্ত্বম্॥ **49.6** ॥

অরালমার্গাগতনির্মলাপাং
মরালকূজাকৃতনর্মলাপাম্।
নিরন্তরস্মেরসরোজৱক্ত্রাং
কলিন্দকন্যাং সমলোকযস্ত্বম্॥ **49.7** ॥

মযূরকেকাশতলোভনীযং
মযূখমালাশবলং মণীনাম্।
ৱিরিঞ্চলোকস্পৃশমুচ্চশৃঙ্গৈ -
র্গিরিং চ গোৱর্ধনমৈক্ষথাস্ত্বম্॥ **49.8** ॥

সমং ততো গোপকুমারকৈস্ত্বং
সমন্ততো যত্র ৱনান্তমাগাঃ।
ততস্ততস্তাং কুটিলামপশ্যঃ
কলিন্দজাং রাগৱতীমিৱৈকাম্॥ **49.9** ॥

তথাৱিধেঽস্মিন্ ৱিপিনে পশৱ্যে
সমুৎসুকো ৱৎসগণপ্রচারে।
চরন্ সরামোঽথ কুমারকৈস্ত্বং
সমীরগেহাধিপ পাহি রোগাৎ॥ **49.10** ॥

॥ ইতি শ্রীমন্নারাযণীযে একোনপঞ্চাশং দশকং সমাপ্তম্॥